
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

श्रंगुलीभिरिवकेशसंचयंसंनिगृह्यतिमिरंमरीचिभिः
कुड्मलीकृतसरोजलोचनंचुंबतीवरजनीमुखंशशी

Acc. No. ~~2669~~ M-1593
Title - गीतगोविन्द (सटीक)
टी. :- गीतगोविन्दटिप्पण.
Author - जयदेव / टी. नारायण पंडित. (भीषदासनियुक्त)
Date - संवत् 1785.
Subject - काव्य
folio - 65.
Xerox - 131

गीत·टी·
१

श्रि२ ग्रंथसं॰

श्रीगणेशायनमः॥भद्रायभवतांभूयात्कृष्णःसद्भक्तिभावितः॥कालिंदीजलसंसर्गिमेघश्यामोतिसुंदरः॥१॥ इहखलु प्रारिप्सितस्यनिर्विघ्नपरिसमाप्त्यर्थंश्रीकृष्णस्मरणरूपंवस्तुनिर्देशात्मकंमंगलंनाचरति॥ ॥मेघैरिति॥ ॥राधामाधवयोरहःकेलयोयमुनाकूलेजयंतीत्यन्वयः॥राधाकृष्णयोरहःकेलयःएकांतक्रीडायमुनातीरेजयंतिसर्वोत्कर्षेणवर्तंते॥

श्रीगणेशायनमः॥मेघैर्मेदुरमंबरंवनभुवःश्यामास्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदिमंराधेगृहंप्रापय॥इत्थं
॥१॥ नंदनिदेशतश्चलितयोःप्रत्यध्वकुंजद्रुमंराधामाधवयोर्जयंतियमुनाकूलेरहःकेलयः

कथंभूतयोराधामाधवयोःप्रत्यध्वकुंजद्रुमंअध्वनिमार्गेकुंजेलतागृहेद्रुमेवृक्षेवइत्थंइतिनंदनिदेशतोनंदाज्ञयाचलितयोः
यद्वाअध्वकुंजद्रुमान्प्रत्युद्दिश्यचलितयोः॥इभीतिकिंहेराधेअंबरमाकाशंमेघैर्मेदुरंसांद्रव्याप्तमित्यर्थःवनभुवःवनभूमयः
द्रुमैस्तमालवृक्षैःश्यामाःअयंकृष्णःनक्तंरात्रौभीरुःभयशीलोतिबालत्वात्तत्तस्मात्कारणात्त्वमेवइमंपुरोवर्तिनंकृष्णंगृहंप्रापय॥सर्व

इदानीं कविः स्वरचितस्य गीतगोविन्दस्य प्रबन्धस्य कीर्त्तनपूर्वकं कृष्णस्य सुरतक्रीडावर्णनं कर्त्तुमाह ॥ वाग्देवतेति ॥ जयदेवकविरेतं प्रबंधं कृष्ण
केलिकथाप्रतिपादकं करोति इत्यन्वयः। कथंभूतो जयदेवकविः वाग्देवताचरिताचित्रितचित्तसद्मा वाग्देवतायाः सरस्वत्याश्च
रितेन नवनवरचनाविशेषेण चित्रितं मंडितं चित्तसद्म मनोगृहं यस्य सः। पुनः कथंभूतः पद्मावत्याः लक्ष्म्याः चरणयोः चारणेन सेवा

वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्त्ती । श्री
वासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधं ॥२॥ ॥

हेतुना चक्रवर्त्ती नृप इव । लक्ष्मीसेवया हि चक्रवर्त्तित्वं प्राप्नोतीति । कथंभूतं प्रबंधं श्रीवासुदेवेति श्री राधारूपा वासुदेवः श्रीकृ
ष्णस्तयोः रतिकेलिकथया सुरतक्रीडाकथनेन समेतं युक्तं ॥२॥ श्रीरामचंद्राय नमः ॥ श्रीराधारमणाय नमः ॥ ॥

गीतगो.
२

सकृत्वा २

अथकविर्निजग्रंथप्रयोजनमाह ॥ यदीति ॥ हे कृष्णसमर्कैत्तरानाहि जयदेवसरस्वतीं शृणुइत्यन्वयः ॥ यदियदिहरिस्मरणेकृष्ण
चिंतनेसरसंसानुरागंनवमनोस्तीत्यध्याहारः ॥ यदियोर्हिविलासुविलासःकृष्णविलासःकलाश्चतुःषष्टिस्तासुकुतूहलम्

यदिहरिस्मरणेसरसंमनोयदिविलासकला
सुकुतूहलं ॥ मधुरकोमलकांतपदावलींशृ
णुतदाजयदेवसर[illegible]स्वतीम् ॥ ३ ॥ ॥

स्यात् ॥ कथंभूतांजयदेवसरस्वतींमधुरासरसाअर्थतःकोमलाशब्दतःअंतःकांतामनोहरापदावलीपदसमूहोयस्यांसा ३

राम.
२

कविरन्यग्रंथेभ्योमहूंथेभ्योमहूंथेवहवोगुणाःसंतीतिध्योनयत्राह।। ।।वाचइति।। ।।उमापतिधरःकविवाचःवचनानि पांपल्लवयतिविस्तारयतिनतुरसादिकं।।संदर्भिशुद्धिमर्थतःशब्दतश्चग्रंथनाविशुद्धिंजयदेवपरंजानीतेनान्यइत्यर्थः शरणः कविर्दुरूहद्रुतेःविषयस्य ग्रंथस्पर्शाद्योच्चारणतःश्ला

वाचःपल्लवयत्युमापतिधरःसंदर्भशुद्धिंगिरांजानीतेजयदेवएवशरणःश्लाघ्योदु
रूहद्रुतेः।।शृंगारोत्तरसत्प्रमेयरचनेराचार्यगोवर्द्धनस्पर्द्धीकोपिनविश्रुतिधरोधो
यीकविक्ष्मापतिः।।४।।

घ्यःरूत्मःशृंगारोत्तमृं श्रुतः गारोत्तराणिशृंगारप्रधानानि संतिउत्कृष्टानिप्रमेयानिवाक्यानितेषांरचनैःप्रबंधैःआचार्यगोवर्द्धनस्पर्द्धीकोपीनविश्रुतःआचार्यगोवर्द्धनःकविःशृंगारप्रधानमेव प्रबंधंकरोतीत्यर्थःधोयीनामाकविःक्ष्मापतिःकविराजःश्रुतिधरःश्रुत्याश्रवनमात्रेणैवधारयतिनपुनरथादिग्रहणेप्रवीणइत्य

[illegible] ।।४।।

गी॰टी॰
२

शुकद्युतिः२

कविरधुना भक्तानुग्रहार्थं विघ्नाभावार्थं च दशावतारवर्णनमाह ॥ ॥प्रलयेत्यादि जगदीशइत्यंतं ॥ ॥अस्य गीतस्य माल
वरागः ।तल्लक्षणं नितंबिनी चुंबनवक्त्रपद्मः कुंडलवाननमत्तः सकेतमाल्यां विशति प्रदोषे मालाधरो मालवरागराजः ॥१॥
हे केशव धृतमीनशरीर वेदोद्धारणार्थं येन हे जगदीश हरे जय जय उत्कर्षेण वर्द्धस्व कस्मादित्यत आह ।त्वं प्रलयपयोधिजले

गौडामालवरागे ॥ ॥रूपकताले ॥ ॥प्रलयपयोधिजले धृतवानसि वेदं ॥ विहितवहित्रचरित्रमखेदं ॥
केशव धृतमीनशरीर जय जगदीश हरे ॥१॥ क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे ॥ धरणिधरण
किणचक्रगरिष्ठे ॥ केशव धृतकच्छपरूप जय जगदीश हरे ॥२॥

कल्पांतसमुद्रजले वेदं धृतवानसि कथमखेदं अपरिश्रमं यथा ।पुनः कथं विहितेति ।विहितं कृतं वहित्रचरित्रं समुद्रतरणक
रणनौकावेष्टितं यत्र क्रियायां ॥१॥ क्षितिरिति ॥ हे केशव धृतकच्छपरूप येन हे जगदीश हे हरे जय ।तव पृष्ठे क्षितिः पृथ्वी तिष्ठती
त्यन्वयः कथंभूते पृष्ठे अतिविपुलतरे अतिक्रांतविपुलतरः पदार्थो येन पुनः कथंभूते धरणिपृष्ठोद्धारणेन वहनेन यत्किणचक्रं तेन

पाने २

गीतगोविंदटीका ॥२॥

वसति ॥ ॥ केशवेत्यादि पूर्ववत्‌ ॥ धृतं शूकररूपं येन ॥ तव दशनशिखरे दंताग्रभागे धरणी पृथ्वी लग्ना संबद्धा वसति ॥ तत्र
दृष्टांतः केशव शशिनि चंद्रे निमग्ना अंतःस्थिता कलंककलेव कलंकरेखेव ॥ ३ ॥ ॥ तवेति ॥ ॥ हे धृतनरहरिरूप सिंहस्वरूपं येन तत्
करकमलवरे हस्त
संबोधनं ॥ तव कर

वसति दशनशिखरे धरणी तव लग्ना शशिनि कलंककलेव निमग्ना केशव धृतशूकररूप जय जग
दीश हरे ३ तव करकमलवरे नखमद्भुतशृंगं दलितहिरण्यकशिपुतनुभृंगं केशव धृतनरहरिरूप
जय जगदीश हरे ४

पद्मश्रेष्ठे नखमस्तीत्यध्याहारः ॥ कथंभूतं नखं अद्भुतं ॥ शृंगं अद्भुतमाश्चर्यकारकं शृंगं अग्रभागो यस्य ॥ अद्भुतत्वे हेतुमा
ह ॥ दलितो विदारितः हिरण्यकशिपोर्दैत्यस्य तनुरेव भृंगो भ्रमरो येन अन्यत्र भ्रमरः कमलं दलयति इह तु वैपरीत्येन नि आश्चर्यं ॥ ४ ॥

गी॰टी॰
४

छलयसीति॥ धृतं वामनरूपं येन हे अद्भुतवामन आश्चर्यहेतुवामन त्वं विक्रमणे पादविक्षेपे करणे बलिमसुरं छलयसि
वंचयसि कीदृशस्त्वं इति संबोधनं पदेति पदनखनीरेण पदनखाग्रसंबंधिजलेन गंगारूपेण जनितं कृतं जनपावनं लोकपावनं येन॥ चि

छलयसि विक्रमणे बलिमद्भुतवामन पदनखनीरजनितजनपावन केशव धृतवामनरूप जय जगदीश हरे
५ क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमितभवतापं केशव धृतभृगुपतिरूप जय जगदीश हरे
६

यं येन ५ क्षत्रियेति हे धृतभृगुपतिरूप धृतपरशुरामरूप क्षत्रियरुधिरमये पयसि जगत्त्वं स्नपयसीत्यन्वयः क्षत्रिय
शोणितविकारजलेन जगत्त्वं स्नपयसि स्नानं कारयसि स्नाने फलमाह कथंभूतं जगत् अपगतपापं गतकलुषं पुनः कथंभूतं शमितभवता

8

लंक

वसतीति॥ ॥केशवेत्यादि पूर्ववत्॥ धृतं शूकररूपं येन। नवदशनशिखरेदंताग्रभागे धरणी पृथ्वी लग्ना संबद्धा वसति। तत्र दृष्टांतः केशवशशिनि चंद्रे निमग्नान्तःस्थिता कलंककलेव कलंकरेखेव॥३॥ ॥तवेति॥ ॥हे धृतनरहरिरूपं सिंहस्वरूपं येन तत्संबोधनं। तवकर कमलवरे हस्त

वसति दशनशिखरे धरणी तव लग्ना शशिनि कलंककलेव निमग्ना केशव धृतशूकररूप जय जगदीश हरे ३ तव करकमलवरे नखमद्भुतशृंगं दलितहिरण्यकशिपुतनुभृंगं केशव धृतनरहरिरूप जय जगदीश हरे ४

पद्मश्रेष्ठे नखमस्तीत्यध्याहारः। कथंभूतं नखं अद्भुतं शृंगं अद्भुतमाश्चर्यकारकं शृंगं अग्रभागो यस्य। अद्भुतत्वे हेतुमाह। दलितो विदारितः हिरण्यकश्यपोर्दैत्यस्य तनुरेव भृंगो भ्रमरो येन अन्यत्र भ्रमरो कमलं दृत्यनेइह तु वैपरीत्येन नि आश्चर्यं॥४॥

कं२

वितरसी नि हे धृतरामशरीर त्वं रणे संग्रामे दशमुखमौलिबलिं तावणमस्तकोपहारं दिक्षु दिशासु वितरसि कीदृशं दिक्पतिकमनीयं इंद्रादीनां काम्यमभिलाषाविषयमित्यर्थः रमणीयं मनोहरं दशदिक्षु दशशदानात् ७ वहसीति हे धृतहलधर रूपधृतवलभद्ररूप त्वं वपुषि विशदे वसनं वस्त्रं वहसि धारयसि कथंभूते वपुषि विशदे शुभ्रे कथंभूतं वसनं जलदाभं जलमेव सदृशं घनं

वितरसि दिक्षु रणे दिक्पतिकमनीयं दशमुखमौलिबलिं रमणीयं केशव धृतरामशरीर जय जगदीश हरे ७
वहसि वपुषि विशदे वसनं जलदाभं हलहतिभीतिमिलितयमुनाभं केशव धृतहलधररूप जय जगदीश हरे ८
निंदसि यज्ञविधेरहह श्रुतिजातं सदयहृदयदर्शितपशुघातं केशव धृतबुद्धशरीर जय जगदीश हरे ९

पुनः कथंभूतं हलहतिभीत्या लांगलाघातभयेन मिलिता उपमिता या यमुना तद्वदाभा दीप्तिर्यस्य भयेनागत्य श्यामत्वं भवति ८ निंदसीति हे धृतबुद्धशरीर धृतबुद्धावतार हे सदयहृदय परया सहितांतःकरण अहह इति खेदानुकारे दयायां वा त्वं यज्ञविधेः क्रतुविधानस्य श्रुतिजातं वेदसमूहं निंदसि कथंभूतं दर्शितपशुघातं दर्शितः प्रतिपादितः पशूनां घातो वधो यत्र ९ श्रीराम

बु२

गीत·टी·
५

३२

म्लच्छेति हे धृतकल्किशरीर धृतकल्किावतारशरीर त्वं म्लेच्छनिवहनिधने म्लेच्छसमूहमारणनिमित्तं किमप्यनिर्वचनीयं क
रवालं खड्गं कलयसि धारयसि कथंभूतं करवालं धूमकेतुमिव औत्पातिकतारकापातमिव करालं भयानकं यद्वा धूमकेतुर

म्लेच्छनिवहनिधने कलयसि करवालं धूमकेतुमिव किमपि करालं केशव
धृतकल्किशरीर जय जगदीश हरे १० श्रीजयदेवकवेरिदमुदितमुदारं शृणु
सुखदं शुभदं भवसारं केशव धृतदशविधरूप जय जगदीश हरे ११

ग्निः १० श्रीजयदेवेति हे धृतदशविधरूप धृतदशप्रकारशरीर श्रीजयदेवकवेरिदमुदितं भाषितं शृणु श्रो
त्रपथेनि भक्तानां प्रयुंक्ति कीदृशमुदारं मनोहरं सुखदं सुखदायकं शुभदं कल्याणदायकं भवसारं संसारे धनरूपं ११

राम
५

वेदानिति कृनोग्रेवबनारभ्युनःमंक्षेपेणकीर्त्तयति तुभ्यंकृष्णायनमोस्त्वित्यन्वयः कथंभूतायकृष्णायवेदानुद्धर
ते मीनरूपेण पुनःजगन्निवहतेधारयतेकूर्म्मरूपेणभूगोलंपृथ्वीवक्रंउद्बिभ्रते उद्धारयतेवराहरूपेणदैत्यंहिर
ण्यकशिपुंदारयतेनृसिंहरूपेण वलिंदैत्यंछलयतेवंचयतेवामनरूपेण क्षत्रक्षयंक्षत्रियनाशंकुर्वतेपरशु

वेदानुद्धरतेजगन्निवहतेभूगोलमुद्बिभ्रतेदैत्यंदारयतेवलिंछलयतेक्षत्रक्षयंकुर्वते
पौलस्त्यंजयतेहलंकलयतेकारुण्यमातन्वतेम्लेच्छान्मूर्छयतेदशाकृतिकृतेकृष्णा
यतुभ्यंनमः १

८

रामेण पौलस्त्यंरावणंजयतेरामरूपेण हलंलांगलंकलयतेधारयतेवलभद्ररूपेण कारुण्यंदयामातन्वतेवि
तन्वते विस्तारयतेबुद्धरूपेणम्लेच्छानंत्यजानामूर्छयतेनाशयेत कल्किरूपेण अतएवदशाकृतिकृतेदशविधरूपधारि

गीत-टी.
६

कविरिदानीं गुर्ज्जरीरागेणरूपसंक्षेपेणाह रागलक्षणं श्यामासुकेशीमलयद्रुमाराणां मृदुल्लसन्मल्लवतल्पयानाश्रुतेःस्वराणां
दधतीतिबभागतत्रिमुख्याद्दक्षिणगुर्ज्जरीयमिति श्रितेति हेदेवहेहरे जयजयपरवभक्तपक्षपातेस्वोत्कर्षणवर्द्धस्व
श्रितेत्यादीनिसप्तपदानिसंबोधनानिज्ञातव्यानि यद्वातिपरंक्षेत्रेत्यर्थे हे श्रितकमलाकुचमण्डलश्रितंकमलायालक्ष्म्याः
कुचमण्डलयेन हे धृतकुण्डलेयेन हेकलितेतिकलितान्याधृतानिललितानिसुंदरावनमालापुष्पदामयेन १ दिनमणीति

गुर्ज्जरीरागेणप्रतिमठताले श्रितकमलाकुचमण्डलधृतकुण्डलए कलितललितवनमालजयजयदेव
हरे १ दिनमणिमण्डलमण्डनभवखण्डनए मुनिजनमानसहंसजयजयदेवहरे २ कालियविषधरगंजनजनरंजन
ये यदुकुलनलिनदिनेशजयजयदेवहरे ३ मधुमुरनरकविनाशनगरुडासनए सुरकुलकेलिनिदानजयजयदेवहरे ४

हे दिनमणिमण्डनसूर्यमण्डलालंकारभूत हे भवखण्डनभक्तानांसंसारनाशकहेतु मुनिजनमानसहंसमुनिजनानां
मानसेमनसिहंसइवमानसेसरसिहंसोऽसि जयजयेतिपूर्ववत् २ कालियेति कालियनाम्नःसर्पस्यगंजनंहिंसकः ग
नरंजनभक्तरंजकः यदुकुलेति यादवकुलकमलसूर्ये ३ मधिति मधुमुरनरकसंज्ञकानांदैत्यानांनाशके गरुडा
सनगरुडएवासनंयस्यसुरकुलेतिसुरकुलानांदेवसमूहानांकेलेःक्रीडायाःसुरतस्येतियावत्निदानंआदिकारण ४

राम.
६

अमलेति अमलकमलंववनिर्म्मलपद्मपत्रवल्लोचनेयस्या भवमोचनसंसारभंजक त्रिभुवनेति भुवनमेवभवनंगृहं तत्रनिधानमिवनिधिरिव ५ जनकेति जनकसुतायाःकृतभूषणकृतालंकार जितदूषणजितराक्षसमर्प्यद्या जितपाप समरेति समरेसंग्रामेशमितोदशकंठोरावणोयेन अभिनवेति सजलमेघसुंदर धृतमंदरधृतमंदराचला श्रीमुखमेवचं

अमलकमलदललोचनभवमोचनए त्रिभुवनभवननिधानजयजयदेवहरे ५ जनकसुताकृतभूषण
जितदूषणए समरशमितदशकंठजयजयदेवहरे ६ अभिनवजलधरसुंदरधृतमंदरए श्रीमुखचंद्रच
कोरजयजयदेवहरे ७ तवचरणेप्रणतावयमितिभावए कुरुकुशलंप्रणतेषुजयजयदेवहरे ८
श्रीजयदेवकवेरिदंकुरुतेमुदं मंगलमुज्वलगीतंजयजयदेवहरे ९

द्रस्तत्रचकोरइव ७ श्रीजयदेवेति हेदेवहेहरेजयजयेतिप्रार्थयते श्रीजयदेवकवेरिदमुदितंमंगलंगीतविशेषःमुदर्षकुरुतेकुरुतात्पदकानामितिशेषः कथंभूतमिदंमंगलंउज्वलंगीतं नानाउगमनेनरम्यंगीतंगानंयस्मिन्न ९

गी॰टी॰
१

अधुनाकविःकामोद्दीपकत्वाद्वसंतस्यवर्णनव्याजेनकृष्णक्रीडांकर्तुंभक्तानांप्रत्याशिषंब्रूते पद्मेति मधुसूदनस्यकृष्णस्यो
रोवक्षःस्थलंवोयुष्माकंप्रियमभिलाषमनुपूरयतुइत्यन्वयः कथंभूतमुरःपद्मेति पद्मालयालक्ष्म्याःपयोधरतटीमननपरिरम्भ
स्यपरिरंभनेनालिंगनेनलग्नंयत्काश्मीरंकुंकुमकेशरंतेनमुद्रितंचिह्नितंममैवेदंवक्षःस्थलंनान्यस्याइतिभावः पुनःकथंतमिवव्य
क्तानुरागमिवप्रकटानुरागमिव पुनःकथंभूतंउरः खेलेति खेलन्खेलनंकुर्वन्योनंगःकंदर्पस्तस्यखेदेनसुरतायासेनस्वेदां

पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरोमधुसूदनस्य व्यक्तानुरागमिवखेलदनंगखेदस्वेदांबुपूरम
नुपूरयतुप्रियंवः १ वसंतेवासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतींकांतारेबहुविहितकृष्णानुसरणां अमंदं
कंदर्पज्वरजनितचिंताकुलतयावलद्बाधांराधांसरसमिदमूचेसहचरी २

बुपूरोघर्मजलप्रवाहोयत्र १ अधुनाविरहोत्कंठितायाराधायाःकाचित्सखीसरसंसविलासंवक्ष्यमाणंराधांप्रत्यूचे अवद
त् कथंभूतांराधांवासंतीकुसुमसुकुमारैर्माधवीपुष्पसुकोमलैरवयवैरंगैरुपलक्षितं उपलक्षणेतृतीया कथंभूतांराधांका
न्तारेदुर्गमेवर्त्मनिभ्रमंतिं पुनःकथंभूतांबहुविहितंवारंवारंकृतंहाराकृतंकृष्णानुसंधानंयया पुनःकथंभूतांअमंदमुत्कटंयथास्या
त्तथाकंदर्पज्वरेणकामज्वरेणजनितयाउत्पादितयाचिंतयाताआकुलतातयाआकुलत्वाद्वलंतीउद्गच्छंतीबाधापीडायस्याः २

राम
१

15

स०

पूर्वोक्तमर्थं गीतेनाह। ललितेति। एतस्य वसंतरागः रागलक्षणं शिखंडिबर्होच्चयबद्धचूडः पुष्पं .. चूतलतांकुरेण भ्रमन्मदाबासमनंगमूर्तिर्मनो मतंगस्य वसंतरागः १ हे सखि इह गिरिहसरसवसंते विहरति युवतिजनेन समं नृत्यति वेति। ध्रुवगतपरेणान्वयः। हेराधे हरिः हृत्पाद हृद्गम्यमनोहरे वसंतसमये क्रीडति कामिनीसमूहेन हननेन करोति च कीदृशे वसंते विरहिजनस्य वियोगजनस्य दुरंते दुःखेनांतः समाप्तिर्यस्य तादृशे। कुत्रस्थलइत्यपेक्षायां सप्तमपद्यस्थितेन वृंदावनविपिनशब्देनान्वयः कीदृशे वसंते मलयेललितेत्यादिसप्तपदीपदानि वसंतसमयाविशेषणानि

वसंतरागे रूपकताले। ललितलवंगलतापरिशीलनकोमलमलयसमीरे। मधुकरनिकरकरंबितकोकिलकूजितकुंजकुटीरे॥ ललितायामते
रे १ विहरति हरिरिह सरसवसंते। नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरंते॥ ध्रुपदं॥ उन्मदमदनमनोरथ॥
पथिकवधूजनजनितविलापे॥ अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे॥२॥

जताया हृगयाल्वंगशा

नेन संपर्केन कोमललो गंधमनोहरो मलयसमीरो मलयानिलो यत्र अनेनवायोः सुगंधित्वमंदत्वशीतलत्वान्युक्तानि मधुकरनिकरेण भ्रमरसमूहेन करंबितैर्मिश्रितैः कोकिलैः कूजितैः शब्दितैः कुंजस्य लतागृहस्य कुटीरो ऽल्पकुटी यत्र। २ उन्मदेति उन्मदः मदनो हर्षकामो यत्र स्तंभतो मनोरथो यस्य एवंभूतो यः पथिकवधूजनः पांथस्त्रीजनः तेन जनितउत्पादितो विलापः परिदेवनं यत्र। अलिकुलेति अलिकुलेर्भ्रमरसमूहैः संकुलैर्व्याप्तैः कुसुमसमूहस्तेन निराकुलो व्यस्तो बकुलानां वृक्षाणां कलायाः समूहो यत्र। २॥

नकुंज

गीत-टी
८

मृगेति मृगमदस्य कस्तूरीकायाः सौरभरभसवशंवदस्य सुरभिनोत्साहस्यायत्तनार्वर्तिनी नवारूनलालमालापत्रसालयोर्द्वहशास्तमा
लःयत्र नूतनपत्रस्तमालो मृगमदगंधमनुकरोतीति युवजनानां तरुणजनानां हृदयं विदारयतीत्येवंविधो यो मनसिजः कंदर्पस्तस्य या
नितखानितद्वत्रुचिर्दीप्तिर्यथा मेवंभूतानां किंशुकानां पलाशपुष्पाणां जालसमूहो यत्र ३ मदनेति मदनमहीपतेः कामनृपस्य कन
कदंडछत्रं तद्वत्रुचिर्यस्य एवंभूतः केसरकुसुमविकासो नागकेसरपुष्पप्रादुर्भावोयस्मिन् मिलितेति मिलिताः शिलीमुखाभ्रमरीये

मृगमदसौरभरभसवशंवदनवदलमालतमाले युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजा
ले ३ मदनमहीपतिकनकदंडरुचिकेसरकुसुमविकासे मिलितशिलीमुखपाटलिपटलकृतस्मर
तूणविलासे ४ विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे विरहिनिकृंतनकुंतमुखाकृति
केतकिदंतुरिताशे ५

षु तैः पाटलिपटलैः पाटलापुष्पसमूहैः कृतः स्मरतूणविलासः कामतूणीरशोभितं यत्र ४ विगलितस्य शिथिलावयवस्यातएव
लज्जितस्य जगतः अवलोकनेन दर्शनेन तरुणकरुणैः तरुणकरुणस्य पुष्पप्रकासव्याजेन कृतोहासो हास्यं यत्र विरही
नि विनिकृंतनानि वियोगिमारकानि कुंतमुखाकृतीनि भल्लमुखाकाराणि यानि केतकीपुष्पाणि तैर्दंतुरिताव्याप्ता आशा दिशो

राम
८

गीत ५

२।६

माधविकेति माधविकाया वासंतीलताया मलेन गंधेन ललिते मनोहरे एवं मालिकया नेवारपुष्पेण नेवारपुष्याणि नातिसुगंधौ मुनिमनसामपि आषाचित्तानामपि मोहनकारिणि मदजनके तरुणानां युवां अकारणबंधौ सहज मिते ६ वृंदावनविपिने हरिः क्रीडतीत्यन्वयः स्फुरदति स्फुरंत्याश्चलंत्या अतिमुक्तलतायाः वासंतीलतायाः परिरंभणेनालिंगनेन मुकुलितः पुष्पितः पुलकितो हृष्ट आम्रवृक्षो यत्र कथंभूते वृंदावनविपिने परिसरपरिगतयमुनाजलपू

माधविकापरिमलललिते नवमालिकयातिसुगंधौ मुनिमनसामपि मोहनकारिणि तरुणाकारण[illegible]बं
धौ ६ स्फुरदतिमुक्तलतापरिरंभणमुकुलितपुलकितचूते वृंदावनविपिने परिसरपरिगतयमुनाजलपूते ७
श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारं सरसवसंतसमयवनवर्णनमनुगतमदनविकारं ८

ते परिसरे पर्यंतभागे परिगंतव्याप्तं यद्यमुनाजलं तेन पूते पवित्रे ७ श्रीजयदेवेति श्रीजयदेवकवेरिदं भणितमुदयति उत्कर्षं प्राप्नोतीत्यर्थः हरिचरणस्य स्मृतिस्तु चिंतनं संसारे सुखं यत्र सारं सुमनोहरं वसंतसमयवर्णनं यत्र अनुग तो ऽनुकूलो मदनविकारः कामविलासो यस्मिन् ८ श्रीराधारमणाभ्यां नमः . श्रीराम राम राम

गीत-टी-
८

वियोगिनां दुःसहत्वं संतः वातुं वर्णयति दोषि इह वसंते गंधवाहो वायुश्चेत अर्थाद्विरहिणां दहतीत्यन्वयः किं कुर्वन् दरवि
दलितायाईषद्विकसितायामल्ल्यमल्लिकायावल्लीखुल्लनखुवंचाद्भिः रक्तद्भिः परागैः उद्यत्स्तोभिः प्रकाटितपटवासैः स्फुटीकृतप
टवासपूरैः काननानि वनानि वासयन् सुरभीकुर्वन् पुनः कथंभूतः केतकीपुष्पाणां गंधस्य बंधुः मित्रं प्रसरं तोयेत्र मवाणेः म
मवाणस्तेषां प्राणवद्गंधवाहः १ वसंतवासराणां अनंगोद्दीपकत्वमाह उन्मीलदिति अमी वसंतसंबंधिनो वासराः दि

दलितवल्लीवल्लिचंचत्पराग प्रकटितपटवासैर्वासयन्काननानि इह हि दहति चेतः केतकीगंधबंधुः प्रसरदसमवाण-
प्राणवद्गंधवाहः १ उन्मीलन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वरा
नीयंते पथिकैः कथंकथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः २

वसाः पथिकैः मार्गस्थैर्विरहिभिः कथंकथमपि केनापि दुःखेन नीयंते कथंभूताः वासराः उन्मीलन् यो मधुगंधः पुष्परसगंधस्ते
न लुब्धा ये मधुपा भ्रमरास्तैर्व्याधूताः कंपिता ये चूतांकुरा आम्रांकुरास्तेषु क्रीडतां कोकिलानां काकली कलकलैः सूक्ष्म
ध्वनिमधुरध्वनिकोलाहलैः कष्टजनकत्वेन उद्गीर्णाः प्रकाशिताः कर्णज्वराः श्रवणोपतापा येषु कथं नीयंत इत्यत्राह ध्या
नेति ध्यानं चिंतनं अवधानं चित्तैकाग्र्यं तेन क्षणं अल्पकालं प्राप्ता या प्राणसमा नायिका तया समागमरसेन संबंधसुखेनोल्ला

अनेकेति असौ सखी राधिकां पुनराहेत्यन्वयः कथंभूता सावी आराद्दूरवर्त्तमानं समक्षं यथा स्यात्तथा कृष्णमुपदर्शयंती विषयंका
रयंती कीदृशं अनेकनारीणां परिरंभसंभ्रमेणालिंगनादरेण स्फुरन् अतिशयेन लगन् मनोहारी मनोज्ञो यो विलासः क्रीडा तत्र लालस
आसक्तस्तं पश्चात्कर्मधारयः ३ अमुमेव श्लोकोक्तमर्थमाह चंदनेति रामकरीरागः रागलक्षणं तु स्वर्णप्रभाभास्वरभूषणा
चनीलं निचोलं सुतनो कहंती कांते भरोद्यानमधिश्रिते पिमानोन्नतारामकरीप्रदिष्टेति हे विलासिनि राधे इह मुग्धवधूनिक

अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं मुरारिमारादुपदर्शयंत्यसौ सखी समक्षं पुनरा
हराधिकां ३ रामकरीरागेण रूपकताले चंदनचर्चितनीलकलेवरपीतवसनवनमाली केलिचलन्मणि
कुंडलमंडितगंडयुगस्मितशाली हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे १

रे मनोहरकामिनीसमूहे हरिर्विलसति क्रीडति कथंभूते वधूनिकरे केलिपरे क्रीडातत्परे कथंभूतो हरिः चंदनेति चंदने
न मलयजेन चर्चितो रचितो वा कोरेणानुलिप्तं नीलं कलेवरं यस्य पीतं सुवर्णवर्णं वसनं वस्त्रं यस्य वनमाला यस्यास्ति इति नः
प्रत्येकं कर्मधारयः पुनः कथंभूतः केलिना क्रीडया चलंती ये मणिकुंडले मणिप्रयुक्ते कुंडले ताभ्यां मंडितं शोभितं गंडयुगं
यस्य स्मितेन ईषद्धास्येन शालते शोभते नः कर्मधारयः १

गीत०टी०
१०

पीनेति हे राधे काचिद्गोपवध्वः गोपांगना पीनपयोधरभारेण विपुलकुचगौरवात् निश्रायेन सरागं सानुरागं यथा स्यात्तथा हरिं प
रिरभ्यालिंग्य उदंचितपंचमारागं अनुउद्दीहितपंचमरागगास्यास्य पश्चाद्गायति गानं करोति [illegible] गानानंतरं स्वयं गायति इत्यर्थः २
कापीति काचिन्मु[illegible]धवधूर्मनोहरगोपांगना ऽधिकमतिशयेन मधुसूदनवदनस[illegible] [illegible]सुखं वा मुखं ध्यायति चिंतयति विला

पीनपयोधरभारभरेण हरिं परिरभ्य सरागं गोपवधूरनुगायति काचिदुदंचितपंचमरागं २ कापि विलास
विलोलविलोचनखेलनजनितमनोजं ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजं ३ कापि कपो
लतले मिलिता लपितुं किमपि श्रुतिमूले चारु चुचुंब नितंबवती दयितं पुलकैरनुकूले ४ [illegible]

१२

सेन विलोलयोश्चंचलयोर्विलोचनयोः खेलनेन संचारेण जनितं उत्पादितो मनोजः कामो येन ३ कापि [illegible]
कापि नितंबवती गोपांगना श्रुतिमूले कपोलतले गंडदेशे चारु मनोज्ञं यथा स्यात्तथा चुचुंब चुंबितवती कथंभूता किमपि
कार्यं लपितुं वक्तुं श्रुतिमूले कर्णप्रदेशे मिलिता संलग्ना कीदृशे कपोलतले पुलकैरोमांचैरनुकूले प्रमप्रियकथके ४

राम
१०

21

२न४ नं४ ना१

केलिइति काचिद्गोपी केलिकलाकुतूकेन हेतुनाशृंगाररसक्रीडासौंदर्येण हेतुना कोणहस्तेन सुकृष्णं दुकूले पट्टवस्त्रे विचकर्ष

कोलिइति काचिद्गोपी केलिकलाकुतूकेन हेतुनाशृंगाररसक्रीडासौंदर्येण हेतुना कोणहस्तेनामुंकृष्णंदुकूलेपट्टवस्त्रेविचकर्ष

कथंभूतमसुंयमुनाजलेकूलेयमुनाजलोपलक्षितेकूलेतीरेमंजुलोमनोहरोयोवंजुलकुंजोवेतसलतागृहंतत्रगतंवने आकृष्टवतीकथंभूतमसुंयमुनाजलेकूलेयमुनाजलोपलक्षितेकूलेतीरेमंजुलोमनोहरोयोवंजुलकुंजोवेतसलतागृहंतत्रगतं

ना रामरमेगोपक्रीडानुरागेमहन्नृत्यपराकृष्णसमक्ष मानं ५ करतलेति काचिद्युवतिर्गोपांगनाहारिणाकृष्णेन प्रशशंसे स्तुता

अभिनःकलस्वनवंशो लंतत्त्यंनीकथंभूतेरासरसेकलयोहस्त लेनचपेटध्वनिनातरलपावंचलवल्याकंकनपंक्त्याकलितेनामि

करतल केलिकलाकुतूकेनचकाचिदमुंयमुनाजलकूले मंजुलवंजुलकुंजगतंविचकर्षकरेणदुकूले ५

तालतरलवलयावलिकलितकलस्वनवंशे रासरसेसहनृत्यपराहरिणायुवतिःप्रशशंसे ६ श्लिष्यति

कामपिचुंबतिकामपिरमयतिकामपिरामां पश्यतिसस्मितचारुपरामपरामनुगच्छतिवामां ७

धुबतितथाकामपि

यत्र मधुरशब्दसहितोवंशोवेणुयंत्र ६ श्लिष्यतीति हेराधेश्रीकृष्णःकामपिकांश्लिष्यतिआलिंगतितथाकामपिचुं अपरांवामांसुंदरींअनुगच्छति

रामांरमयतिक्रीडयति परांनायिकांसस्मितंचारुसहासमनोहरंयथास्यात्तथापश्यति

नं२ पद्यः १ २गोपि

स्या२ यशस्कितं२

गीतगो·टी·
११

श्रीजयदेवकवेरिति श्रीजयदेवकवेरिदंगीतंशुभानिकल्याणानिवितनोतुवर्द्धयतुअर्थाद्भक्तानां कीदृशंगीतंअद्भुतमाश्चर्यकारंकेश
वश्रीकृष्णस्यकेलिरहस्यक्रीडाहर्षोयत्रअद्भुतंयुगपत्सर्वासांगीत्युत्पादनात् वृंदावनविपिनेवृंदावननाम्निवनेललितंनानारसाश्चित
मित्यर्थःयशस्यंयशस्करमित्यर्थः ८ विश्वेषामिति हेसखिराधेमधौवसंतेमुग्धोमनोहारिःकृष्णःक्रीडतीत्यन्वयः कइवमूर्त्तिमान्शरी
रधारीशृंगाररसइवकिं कुर्वन्अनुरंजनेनानु

श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्य वृंदावनविपिनेललितंवितनोतुशुभानियशस्यं ८ विश्वेषामनुरंजनेनजनयन्नानंदमिंदीवरश्रेणीश्यामलकोमलैरुपनयन्नंगैरनंगोत्सवं स्वच्छंदंव्रजसुंदरीभिरभितःप्रत्यंगमालिंगितःशृंगारःसखिमूर्त्तिमानिवमधौमुग्धोहरिःक्रीडति १

रागेणविश्वेषांभक्ता आनंदंसंतोषंजनयन्उत्पा
दयन्पुनःकिंकुर्वन्इंदीवरश्रेणीनीलोत्पलमालातद्वत्श्यामलकोमलैःकृष्णमनोहरैःअंगैरवयवैःअनंगोत्सवंकामहर्षंउपनयन्उत्पा
दयन् पुनःकथंभूतःस्वच्छंदंस्वेच्छयाव्रजसुंदरीभिर्गोपांगनाभिःअभितःसर्वतोभावेनप्रत्यंगंप्रत्यवयवेआलिंगितःगोपीभिरेकदा
लिंगेन यथापदंगंप्राप्नवानरेवालिंगितामिनिभावः स्यामोभवतिशृंगारःसितोहासः प्रकीर्त्तितइति शृंगारविशेषणान्यथ्येनामिदृशानि १

राम
११

मलयानिलस्य दुःसहत्वे कारणमाह अद्र्युत्संगमिति हे गाधे अधेदानीं वसंतसमये श्रीखण्डशैलानिलः मलयजपवनः तुहिनमज्जनेच्छया
उत्संगे क्रोडे वसंतो ये भुजंगाः सर्पास्तेषां कवलं क्लेशात् स्वियासोपतापद्विवईशावलं हिमावलं प्राप्तेपल्लवेच्छया उसरति अद्रु २
ति
छ

औ २ ले

अद्र्युत्संगवसद्भुजंगकवलक्लेशाद्विवेशावलंप्रोर्यपल्लवने
छ पातुसरतिश्रीखंडशैलानिलः किंचीस्त्रग्धरसालमौलि
मुकुलान्यालोक्यहर्षोस्याद्उन्मीलंतिकुहूःकुहूरितिकलोन्नालाः
पिकानांगिरः २

उद्गन्तिवितर्कोवा किंचपश्चात्तरोपिकानांगिरोवाण्यः स्निग्धास्सालमौलिमुकुलानिकोमलचूताग्रभागस्तवककुड्मलानि
आलोक्यदृष्ट्वाहर्षोस्यारानंदोस्यान्तु उन्मीलंतिउद्गच्छंति कथंभूतागिरःकुहूःकुहूरित्याकारेणाव्यक्तमधुरशब्देनउन्नालाःप्रक
टाः २

गीतगो·टी·
१२

कविःकृपोपक्रमंत्यक्त्वालोकान्भृत्याशिषंददाति रासोल्लासेति हरिःकुसुमात्वोयुष्मान्पातुइत्यन्वयः कथंभूतोह
रिः रासोल्लाससभरेणगोपकीडयांहर्षातिशयेनविभ्रमभृतांश्रृंगारविलासधारिणीनां आभीरवामभ्रुवांगोपांगनानामभ्य
र्णेसभापनिर्भरगाढंयथास्यात्तथाउरोवक्षःस्थलंपरिरभ्यालिंग्यराधयाउद्दंडंप्रकटंयथास्यात्तथागीतस्तुतिव्याजाद्ध

रासोल्लसभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णेपरिरभ्यनिर्भरमुरःप्रेमांधयारा
धया साधुत्वद्वदनंसुधामयमितिव्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारी
हरिःपातुवः ३ इतिगीतगोविंदेसामोदहामोदरोनामप्रथमःसर्गः १

६२

नप्रशंसाछलेनचुंबितः किंकृत्वाचिद्वदनंत्वन्मुखंसुधामयममृतमयंसाधुशोभनंइतिव्याहृत्योक्त्वा कथंभूतोहरिःस्मितम
नोहारीराधायाश्चुंबनकौशलंदृष्ट्वास्मितेनेषद्धास्येनमनोहर्तुंशीलंयस्यसः ३ इतिश्रीगीतगोविंदटीकायांप्रथमःसर्गः

राम
१२

विहरति राधा रहः एकांते सखीमुवाच कथंभूता राधा वने वृंदावने हरौ कृष्णे विहरति क्रीडति सति विगलितनिजोत्कर्षात्
निजसौभाग्यादीर्ष्यावशेना माहरिस्तु तया च यतोऽन्यस्मिन्स्थले गता कथंभूते हरौ साधारणप्रणये अन्यगोपीतुल्यप्रेम्णि
अतएव क्वचिदपि लताकुंजे लीना गहे लीना गुप्ता कथंभूते लताकुंजे नानागंभीरशब्दं कुर्वतां मधुव्रतानां भ्रमराणां मंडल्या
समूहेन मुखरशिखरे शब्दायमानाग्रभागे अतएव दैन्योपि दुःखितापि १ श्लोकोक्तमर्थं गीतेनाह संचरदिति हे स

विहरति वने राधा साधारणप्रणये हरौ विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः क्वचिदपि लताकुंजे गुंज-
न्मधुव्रतमंडलीमुखरशिखरे लीना दीनाप्युवाच रहः सखी १ गुर्जरीरागे रूपकताले संचरदधरसुधामधुरध्व-
निमुखरितमोहनवंशं चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं रासे हरिमिह विहितविलासं स्मरति मनो मम कृत-
परिहासं १

खि मम मनः हरिं हरिं स्मरति कथंभूतं हरिं संचरता उच्छलता अधरसुधामधुरेणाधरामृतमनोहरेण ध्वनिना शब्देन मुखरी-
कृतः शब्दितो मोहननामा वंशो येन पुनः कीदृशं चलितेति चलिता आवर्जिता दृगंचलः कटाक्षो यस्य चंचलः मौलिः शेखरं यस्या
कपोलगंडस्थले विलोलश्चंचलो वतंसः कर्णाभरणं यस्य सः ततः प्रत्येकं कर्मधारयः पुनः कीदृशं हरिं इह रासे गोपक्री-
डया विहितविलासं कृतक्रीडं पुनः कीदृशं कृतपरिहासं १ श्रीरामचंद्र श्रीराम जयजयपद्मनाभहरे

कं२

चंद्रकेति चंद्रकेन विचित्रवर्णचिह्नेन चारुणा शोभमानानां मयूरशिखण्डकानां मयूरपिच्छानां मण्डलेन समूहेन वलयितेनाव
लंयाकारेण वेष्टितः केशपाशो यस्य अतस्वप्रचुरेण विस्तारेण अनुपुरंदरधनुषा इंद्रधनुषा अनुरंजितः स्निग्धो मेदुरो निमेघः स्निग्धस्सु
वेशं सुंदरं २ गोपेति गोपकदंबकस्य आभीरसमूहस्य नितंबवतीनां स्त्रीणां मुखचुंबनेन लंभितः प्रापितो लोभो येन पुनः कीदृ
शं बंधुजीवमिव बंधूकपुष्पमिव मधुरः वल्लभो ऽधरपल्लव ओष्ठपल्लवो यस्य बंधुजीवं दुपहरियाभाषायां उल्लसितेनोल्लकटेन स्मि

कु॰२

चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशं प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशं २ गो
पकदंबनितंबवतीमुखचुंबनलंभितलोभं बंधुजीवमधुराधरपल्लवमुल्लसितस्मितशोभं ३ विपु
लपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रं करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रं ४

तेन शोभा यस्य तं ३ विपुलेति विपुलो बहुलः पुलको रोमोद्गमो याभ्यां ताभ्यां भुजपल्लवाभ्यां वलयितं वेष्टितं वल्लवानां आ
भीराणां युवतिसहस्रं गोपिकासहस्रं येन पुनः कीदृशं करौ च चरणौ च उरश्च तेषां समाहारः करचरणोरस्तस्मिन् वर्तमानानां
मणिगणयुक्तभूषणानां किरणेन दीप्त्या विभिन्नं विदारितं तमिस्रं अंधकारो येन तमिस्रं तिमिरं तमः इत्यमरः ४

जलदेति पुनः कीदृशं हरिं जलदपटले मेघसमूहे चलनं संभजन्तः इंदोः ध्वंसस्य विनिंदकं समानं चंदनतिलकं चंदनकृत तिलकं यत्र तादृशं ललाटं यस्य अभूनोध्रमेयं पुनः कीदृशं पीनानां मांसलानां पयोधराणां स्तनानां परिसरस्य पर्यंतदे शस्य मर्द्दने निर्दयं दयारहितं हृदयं कपाटं यस्य ५ मणिमयेति मणिमयेन मणिरूपेण केमरेण मनोहराभ्यां कुण्डला

जलदपटलवलदिंदुविनिंदकचंदनतिलकललाटं पीनपयोधरपरिसरमर्द्दननिर्दयहृदयकपा
टं ५ मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारं पीतवसनमनुगतमुनिमनुजसुरा
२।३ सुरवरपरिवारं ६ विशदकदंबतले मिलितं कलिकलुषभयं शमयंतं मामपि किमपि तरंगदनंग
दृशा मनसा रमयंतं ७

भ्यां मण्डितौ अलंकृतौ गण्डौ गण्डस्थलं यस्य पुनः कीदृशं महान्तं उदारं गंभीरं दातारं वा पुनः कीदृशं पीतवसनं अनुगता आश्रिता मुनयो यतयः मनुजा लोकाः सुरा देवा असुरवरा दैत्याश्च एते परिवारः परिजनो यस्य तम् ६ विशदेति वि शदकदंबतले विमलकदंबतले मिलितं समुपस्थितं पुनः कीदृशं कलिकलुषभयं कलिकालजातपापाद् भयं शमयंतं नाशयंतं पुनः की दृशं मामपि किमपि अनिर्वचनीयं यथा तथा तरंगद् उच्छलन् अनंगो यया तादृश्या दृशा मनसा हृदयेन च रमयंतं ७

गी॰टी॰
१४

श्रीजयदेवेति श्रीजयदेवभणितं गीतं भक्तानां हरिचरणस्मरणं प्रति अनुरूपं योग्यं भवत्विति संध्याहार कथंभूतं अतिसुंदरं मोहनकारकं मधुरिपुरूपं कृष्णस्वरूपं यस्मिन् ८ इदानीं राधायाः कृष्णवसनव्यंजनसोऽवस्यत्वमाह गणयतीति हे सखि मम मनोऽभिन्नं पुनरप्यधुना कृष्णे कामाभिलाषं करोति किं करोमि निवृत्तो उपायान्तरं नास्तीत्यर्थः सुखा

श्रीजयदेवभणितमतिसुंदरमोहनमधुरिपुरूपं हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपं ८ गणयति गुणग्रामं भ्रामं भ्रममादपि नेहते वहते च परितोषं दोषं विमुंचति दूरतः
सुखातिप्रवलतत्त्वसे... विहारिणं मां विना पुनरपि नो वा मे करोति कृष्णे करोमि किं १

श्लो॰१ [कामा॰ म३]

सुगोपीप्रवलत्तैर्जानाभिलषे पुनः कीदृशं मां विना विहारिणं क्रीडाशीले कीदृशं मनः वा मम वशमीत्यर्थः वा
मत्वे कारणमाह मम मनः सापराधस्यापि कृष्णस्य गुणग्रामं गुणसमूहं गणयति भ्रामादपि भ्रामं विस्मरणं
नेहते वेष्ठते भामामानिपाठे भामं क्रोधं नेहते वांछति नहुणकर्णं नमपरितोषं संतोषं स्त्रादिपावज्ञादीकं दूरतो मुंचति

गीतगोविंद ९
१४

पुनरपिराधागीतेनसखीमाह निभृतेति हेसखित्वंकेशिमथनंकृष्णंमयासहरमयक्रीडांकारय कीदृशमुदारंमहांतं
कथंभूतयामदनेमनोरथइच्छातेनभिनुभवितयोसभिप्रायया कथंभूतंहासरसविकारभावसहितं कीदृश्यामयानिभृतंगूढं
निकुंजगृहंलतागृहंगतयाप्राप्तया कथंभूतंकृष्णंनिशिरात्रौरहसिएकांतस्थलेनिलीयनिरोहितीभूयवसंतंनिष्ठं

मालवगौडारागेणगीयते एकतालीतालेन: निभृतनिकुंजगृहंगतयानिशि
रहसिनिलीयवसंतं चकितविलोकितसकलदिशारतिरभसभरेणहसंतं सखि
हेकेशिमथनमुदारं रमयमयासहमदनमनोरथभावितयासविकारं १

पुनःकथंभूतयामयाचकितंसभयंयथास्यात्तथाविलोकितादृष्टासकलादिशोयया पुनःकथंभूतंकृष्णंरतेरभ
सउत्साहस्तस्यभरेणाधिकेनहसंतंसस्मितमुखं अस्मिन्गीतेपूर्वार्द्धेराधाविशेषणंउत्तरार्द्धंकृष्णस्येतिबोद्धव्यं १

चाटुशतैरनुकूले ४

प्रथमेति प्रथमसमागमेन नूतनसंनिध्येन लक्षितया लज्जायुक्तया कथंभूतं कृष्णं वैलक्ष्यदूरीकरणाय पटुभिः कुशलैः नियाभिः चाटुशतैः नित्मवशतां तैरनुकूलं आनुकूल्यकारकं मृदुकोमलं मधुरस्मितपूर्वकं भाषितं यस्याः सा तया शिथिलीकृतं घनबंधनश्लथिकृतं जघनदुकूलं जघनस्थितपट्टवस्त्रं येन २ किसलयेति किसलयस्य शयने पल्लवबद्ध

मृदुमधुर

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं मृदुमधुरस्मितभाषित
या शिथिलीकृतजघनदुकूलं २ किसलयशयननिवेशितया चिरमुरसि मम
मैव शयानं कृतपरिरंभणचुंबनया परिरभ्य कृताधरपानम् ३

तल्पशय्यायां निवेशितया उपवेशितया ममैव उरसि वक्षःस्थले चिरं शयानं कृतालिंगनमित्यर्थः कृतं परिरंभनपूर्वकं आलिंगनपूर्वकं चुंबनं यया सा परिरभ्य आलिंग्य कृतं अधरपानं ओष्ठपानं येन ३ श्रीकृष्णहरेनाथ हरे

गीत-टी-
१५

राम
१५

न२ २२

अलसेति अलसेन सुरतसौख्येन निमीलिते मुद्रिते लोचने नेत्रे यस्याः सा पुलकावल्या रोमांचपंक्त्या ललितौ मनोहरौ कपोलौ यस्य तं श्रमजलेन सुरतश्र
मितेन वारिणा सिक्तं कलेवरं यस्याः सा तया वरेण मदनमदेन कामजनितमदेन अतिलोलमतिचंचलं सततमभिसरयेः ४ कोकिलेति कोकिलानां कलरव
वद्व्यक्तध्वनिवत् कूजितं शब्दो यस्याः तया जितो मनोभिजनं तत्र विचारः कामशास्त्रप्रसिद्धं तो येन तं श्लथाः शिथिलाः कुसुमाः कुन्तलाः पुष्पाश्च ते कुन्तलाः
र्यकुन्तलास्तया नखेनालिखितः स्तनभारो येन ५ चरणेति चरणयोः पादयोः रणितः शब्दो मणिनूपुरो मणिमुक्तनूपुरो य

अलसनिमीलितलोचनया पुलकावलिललितकपोलं श्रमजलसिक्तकलेवरया वरमदनमदातिलोलं ४ कोकिलकलरव
कूजितया जितमनसिजतन्त्रविचारं श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारं ५ चरणरणितमणिनूपुरया परिपूरि
तसुरतविधानं मुखरविशृंखलमेखलया सकचग्रहचुम्बनदानं ६ रतिसुखसमयरसालसया दरमुकुलितनयनसरोजं निःसह
निपतिततनुलतया मधुसूदनमुदितमनोजं ७ श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलं सुखमुत्कण्ठितगोपवधू
कथितं वितनोतु सलीलं ८

स्याः सा तया परिपूरितं संपूर्णीकृतं सुरतविधानं सुरतसमूहो येन मुखरा शब्दायमाना विशृंखला मेखला काञ्ची यस्याः सा सकचग्रहं केशग्रहणसहि
तं चुम्बनदानं यस्य सः ६ रतिसुखेति रतिसुखसमये सुरतसुखकाले पीसालसया आलस्ययुक्तया दरमुकुलितनयनसरोजं ईषन्मीलितनेत्रकम
लं निःसहा असमर्था निपतिता तनुलता शरीरलता यस्याः सा कथंभूतं मधुसूदनं उदितमनोजं जातकामं ७ श्रीजयदेवेति इ
दं श्रीजयदेवेन भणितं गीतं कर्तृ पारलौकिकशुभानि वितनोतु कथंभूतं जयदेवभणितं अतिशयमधिकं मधुवनशीलं
तस्मिन् पुनः कीदृशं शृंगाररसाश्रितं

गीतगो·टी·
१६

हसेति हे सखि गोविंदं कंसं पश्यामि दर्शनेन दृष्ट्वा मनहर्षं प्राप्नोमि कथंभूतं गोविंदं कानने वृंदावने व्रजसुंदरीगणवृतं गोपी
समूहे वेष्टितं पुनः कीदृशं मामुद्वीक्ष्य मां दृष्ट्वा हस्तस्रस्तविलासवंशं हस्तात्स्रस्तो विगलितः विलासवंशः क्रीडावंशः क्रीडार्थं
शोयस्य तं पुनः कीदृशं अनृजुभ्रूवल्लिमन्नानाकुटिलभ्रूलतासुन्दरीनां वल्लवीनां गोपीनां वृंदसमूह उत्सारि ऊर्ध्वानिर्यग्गामि
गंत वीक्षितं कटाक्षैर्येन यस्य पुनः कीदृशं आनिस्वेदेनाति घर्मेणार्द्रगंडस्थलं यस्य आविलाक्षितस्मितं सलज्जहास्यं नरेव सुधाम्भ

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्वल्लवीवृंदोत्सारिदृगंतवीक्षितमतिस्वेदार्द्रगंडस्थलं मामुद्वीक्ष्य विल
क्षितस्मितसुधामुग्धाननं कानने गोविंदं व्रजसुंदरीगणवृतं पश्यामि हृष्यामि च १ दुरालोकस्तोकस्तवकनव
काशोकलतिकाविकासः कासारोपवनपवनोपि व्यथयति अपि भ्राम्यद्भृंगीरणितरमणीया न मुकुलप्रसूतिश्चूतानां
सखि शिखरिणीयं सुखयति २

नं मेन सुग्धाननं मनोहरमुखं १ दुरालोकेति हे सखि दुरालोकदुःखेनालोक्यते वियोगिना सुदृग्जनकत्वात् दुरालोकः स्तोकः
स्यः स्तवकः उद्गमो यस्य नवाशोकलतिकायां विकासः उद्योतः मां व्यथयति पीडयति किंच कासारोपवनपवनोपि सरोवरनिकटवन
पवनोपि मां व्यथयति अपि च चूतानामाम्राणां मियं मुकुलप्रसूतिः कथं कोरकभावः मां न सुखयति कथंभूता भ्राम्यंतीनां चलंती
नां भृंगीनां भ्रमरीणां रणितैः शब्दैः रमणीया मनोहरा इत्यर्थः शिखरिणीं प्रशस्ता अग्रभागवती इत्यर्थः २ श्रीराम

पर म्रा लि

राम
१६

अधुनाकाविलोकावयन्त्याशिषंब्रूते साकूतेनेति नवमंगारस्तरुणोवाकेशवोवोयुष्माकंभक्तानांक्लेशंदुःखंहरतुदूरी
करोतु कीदृशःकेशवःगोपीनांनिभृतंगोप्यभावंनिरीक्ष्यदृष्ट्वाकाचिद्दयितांवल्लभांअंतर्मनोसिचिरंचिंतयन् पुनःकीद
शःमुग्धमनोहारःमोहयुक्तःसुंदरः कीदृशंनिभृतंसाकूतस्मितंस्मामिप्रायंस्मितमीषद्धास्यंयत्रआकुलाकुलोगलद्धम्मिल्लः

साकूतंस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजावालार्द्धस्तनं गोपी
नांनिभृतंनिरीक्ष्यदयितांकाचिच्चिरंचिंतयन्नंतर्मुग्धमनोहरोहरतुवःक्लेशंनवःकेशवः३ इतिगीतगोविंदेद्वि
तीयःसर्गः कंसारिरपिसंसारवासनाबंधशृंखलां राधामाधायहृदयेतत्याजव्रजसुंदरीः १

गलत्स्रस्तीभवन्धम्मिल्लःकेशपाशोयत्रउल्लासितउच्चैःकृ[illegible]भ्रूवल्लीलताथयत्र अलीकेनछलेनदर्शिताभुजावालार्द्धस्तनौ
यस्मिन्भुजाचवालाश्चअर्द्धस्तनाश्चेतिद्वंद्वः ३ इतिगीतगोविंदटीकायांद्वितीयसर्गः इतिराधायाविरहव्यथाउ
क्ताकृष्णस्यविरहव्यथामाह कंसारिरिति कंसारिरपिकृष्णोपिराधांहृदयेमनसिआधायसंस्थाप्यव्रजसुंदरीगोपीस्तत्याज

34

गीतगो॰टी॰
१२

८३

इतस्ततइति समाधवः कलिंदनंदिनीतयांतकुंजेयमुनाकूलेलतागृहे निवसात् हरिस्थितवानित्यर्थः किंकृत्वा इतस्ततोऽनेकस्था नेषुतांराधांअनुसृत्यान्विष्य कीदृशः अनंगवाणव्रणेनकामवाणक्षतेनखिन्नंशरीरं नामानसंयस्य कृतानुतापः कृतपश्चात्तापः २ कृतानुतापत्वमेवाहगीतेन मामियमिति हरिहरीतिखेदसूचकौ रसौधाहतादरतयाहत्वबहुमानत्वेनकुपितेव कोपप्राप्तेव अन्यस्थानेगता मौढ्य

संवधूनिचयेनगोपीसमूहेनवृतंवीक्ष्य

इतस्ततस्तामनुसृत्यराधिकामनंगवाणव्रणखिन्नमानसः कृतानुतापः सकलिंदनंदिनीतटांतकुंजे निषसादमाधवः २ गुञ्जरीरागेणगीयते प्रतिमठतालः मामियंचलितविलोक्यवृतंवधूनिचयेन सापराधतयामयापिनवारितातिभयेन ३ हरिहरिहतादरतयागतासा कुपितेव किंकरिष्यतिकिंवदिष्यतिसाचिरंविरहेण किंधनेनजनेनकिंममजीवितेनगृहेण ४

नंविलोक्यचलिता

इतोगतेत्याहमितिभिन्नेवाक्ये

ता मयापिकृत्स्नेनापिसापराधतयाकृतापराधत्वेनहेतुनातिभयेनवारिता यद्वाकिंभूतेनमयाअतिभयेनअतिशयितंभयंयस्येति ३ किंकरिष्यतीति साराधाचिरंविरहेणचिरकालवियोगेन किंकरिष्यतिकिंवदिष्यति तांराधांविनाममजनेनलोकेनकिंधनेनवाकिंजीवितेनवाकिंगृहेणवनिताविनासर्वविफलमित्यर्थः ४ रामरामरामरामराम

घातिः४ मूलखो॰

राम
१२

35

चिंतयामीति अहं नराननं राधामुखं चिंतयामि स्मरामि कीदृशं नराननं रोषभरेण क्रोधातिशयेन कुटिलेव कं भ्रुवोपस्मिन् किमिव शोणपद्मामिव रक्तोत्पलमिव कीदृशं शोणपद्ममुपरि भ्रमता भ्रमरेणाकुलं ३ तामिति अहं हरिसंगतां स्थितां राधां अनिशं वारंवारं भृशमातिशयेन रमयामि क्रीडयामीति भावनाइह वने तां राधां किमनुस्मर मिह हरिसंगतत्वारिव वृथा यथा व्यर्थमेवा किं विलपामि विलापं करोमि ४ हरिसंगतां तां आस्याह तन्वीति हे तन्वि अस्स

चिंतयामि नराननं कुटिलभ्रूरोषभरेण शोणपद्ममिवोपरिभ्रमता कुलं भ्रमरेण ३ तामहं हृदि संगताम
निशं भृशं रमयामि किं वनेनुसरामि ताम् इह किं वृथा विलपामि ४ तन्वि खिन्नमसूयया हृदयं तवाकलयामि
तन्न वेद्मि कुतो गतासि न तेन तेनुनयामि ५ दृश्यसे पुरतो गतागतमेव मे विदधासि किं पुरेव ससंभ्रमं परिरंभ
णं न ददासि ६ क्षम्यतामपरं कदापि तवेदृशं न करोमि देहि सुंदरि दर्शनं मम मन्मथेन दुनोमि ७

यया सा हृत्तुत्वेनाविन्नं दुःखितं तव हृदयं आकलयामि न तस्मादहं न वेद्मि न जाने कुतः कुत्र गतासि तेन कारणेन तेनुध्यंना
नुनयामि न प्रसादयामि क्रियया मनिधो मे निसंप्रदानतं ५ दृश्यसइति हे राधे त्वं मम पुरतः अग्रे गतागतं गमनागम
नमेव विदधासि करोषीति दृश्यसे नाहि पुरेव पूर्ववत्ससंभ्रमं सवेगं परिरंभणमालिंगनं किं कारणेन ददासि ६ क्षम्य
तामिति हे सुंदरि पूर्वं कृतोपाधः क्षम्यतां अपरमीदृशं तवापराधं कदापि न करोमि अतस्त्वं मम दर्शनं देहि यतोहं मन्मथेन

गीतगो·टी·
१८

वर्णितमिति जयदेवकेनेदं गीतं वर्णितं कीदृशेन जयदेवकेन हरेः श्रवणेन कृतस्याधीनेन पुनः कीदृशेन किंदुबिल्वं जयदेव कुलं देवसमुद्रस्तस्मात्संभवो यस्यैतादृशो रोहिणीरमणश्चंद्र इव यथा सागरादुत्पन्नश्चंद्रस्तथा किंदुबिल्वोत्पन्नो जयदेवइति ८ भ्रूपल्लवमिति इति पूर्वोक्तप्रकारेण स्मरेण कामेन तस्यां राधायां अस्त्राणि किं मार्पितानि स्थापितानि कीदृश्यां तस्यां अनंगस्य कामस्य जयपत्रे लोक्यविजयजंगमदेवतायां गमनदेवतारूपायां कीदृशान्यस्त्राणि अभिजितं जगं निर्जितत्रैलोक्य

वर्णितं जयदेवकेन हरेरिदं प्रवणेन किंदुबिल्वसमुद्रसंभवरोहिणीरमणेन ८ भ्रूपल्लवं धनुरपांगतरंगितानि बाणा गुणः श्रवणपालिरिति स्मरेण तस्यामनंगजयजंगमदेवतायामस्त्राणि निर्जितजगंति किमर्पितानि १ हृदि बिसलताहारो नायं भुजंगमनायकः कुवलयदलश्रेणी कंठे न सा गरलद्युतिः मलयजरजो नेदं भस्म प्रियारहिते मयि प्रहर न हरभ्रांत्यानंग क्रुधा किमु धावसि २

नि इतीनिकीं भ्रूपल्लवं भ्रूलतां धनुः अपांगतरंगितानि कटाक्षनिरीक्षणानि बाणाः श्रवणपालिः कर्णप्रदेशः प्रत्यंच १ हृदि ति हे अनंग त्वं मयि हरभ्रांत्या महादेवभ्रमेण न प्रहर मां प्रहारं कुरु क्रुधा कोपेन किमु किं विधावसि मारयितुं धावनं करोषि हृदि हृदये बिसलताहारो मृणालललना हारो वर्त्तते नायं भुजंगमनायकः शेषः मम कंठे कुवलयदलश्रेणी नीलोत्पलपंक्तिवर्त्तते न सा गरलद्युतिर्हालाहलदीप्तिः इदं मलयजरजो वर्त्तते चंदनलेपो वर्त्तते न इदं भस्म रजः कीदृशे मयि

२१·२स्तु

पाणाविति हे क्रीडानिर्जितविश्वमूर्च्छितजनाविश्वलीलाविजितभुवनकामा अमुं कुसुमसायकं चापं पुष्पबाणं पाणौ हस्ते मा
कुरु चापं च धनुः मा आरोपय मा शरं मा कुर्वीत्यर्थः यतो मूर्च्छितजनाघातेन भूर्च्छितजनपीडया किं ते पौरुषं कस्त्वं पुरुषार्थः म
र्च्छितत्वकारणमाह तस्या एव राधया मृगीदृशो हरिणनयनायाः मनसिजेन कामेन प्रेरितचञ्चलताकटाक्षा नलानां कश्च

पाणौ मा कुरु चूतसायकममुं मा चापमा

रोपय क्रीडानिर्जितविश्वमूर्च्छितजनाघातेन किं पौरुषं तस्या एव मृगी

दृशो मनसिजप्रेरवक्रकटाक्षा शल्याजर्जरितं मनागपि मनो नाद्य

पिसंधु

सते ३

कटाक्षा कटाक्षवङ्गीनां श्रेण्या पंक्त्या जर्जरितं जर्जरितं खंडीभूतं मम मनः मनागपि स्वल्पमपि नाद्यापि संधुक्ष्यते अं कु
कुरितं भवति क्वचित् वक्रकटाक्षा शुगोभिपाठः तदा कराक्षा एव बाणाः ३ श्रीजयदेव हरे श्रीरस्तु रामराम

गीतगोरी·
१८

अथ नामनोविषयीकृतां राधां प्रति स्वयं दुःखमाह भ्रूचापइति हेतन्वि कृशांगि भ्रूचापे भ्रुवावेव चापं धनुस्तत्र निहितोर्पि
तः कटाक्षवाणः मर्म्मपीडां तावन्निर्म्मातु करोतु विशिखस्य मर्म्मव्यथाजनकत्वं युज्यत एवेति भावः श्यामात्मा श्यामव
र्णः कुटिलो वक्राकारः कवरीभारोपि केशसमूहोपि मारोद्यमं तं वक्रोतु मलिनस्य कुटिलस्य च मारणोद्यमो युज्यत एव

भ्रूचापे निहितः कटाक्षविशिखो निर्म्मातु मर्म्मव्यथां श्यामात्मा कुटि
लः करोतु कवरीभारोपि मारोद्यमं मोहं तावदयं च तन्वि तनुतां बिंबाध
रो रागवान् सद्वृत्तस्तनमंडलस्तव कथं प्राणैर्म्मम क्रीडति ४

अयं च बिंबाधरः बिंबोष्ठो मोहं तनुतां विस्तारयतु कथंभूतो बिंबाधरः रागवान् लोहितवर्णः रागिणो विषयिणो मोहो मम
तं युज्यत एव सद्वृत्तः सम्यग्वर्तुलस्तव स्तनमंडलः मम प्राणैः कथं क्रीडति सद्वृत्तस्तु प्राणघातको न भवतीति ४

तानानि नान्येवस्पर्शसुखानियानिउनेरोपकासंगमेऽभूवन्तानि नेचरोनेत्लाश्चंचलाः स्निग्धाःप्रेमार्द्रिनाहशोऽभ्रू
वोर्विभ्रमाविलासः एतेनेरूपं तदेववक्त्रांबुजसौरभंवस्तकमलसुरभितं सदवसुधास्यंदीअमृतइववधुकः गिरांवचनोत्तंच
एतेनशब्दःसाच
क्रिमावक्रत्वं

तानिस्पर्शसुखानितेचतरला
स्निग्धादृशोविभ्रमास्तद्वक्त्रांबुजसौ
रभंसचसुधास्यंदीगिरांवक्रिमा सायिंबाधर
माधुरीतिविषयासंगेपिचेन्मानसंतस्या
लग्नसमाधिहंतविरहव्याधिःकथं
वर्त्तते ५

बिंबाधरमा धुरीबिंबवत्त्रौ
ष्ठमाधुर्यतदेव एतेनरसः इतिविषयासंगोपितस्यारूपरसस्पर्शगंधानां पंचानांसान्निध्येपिमग्नमानसंमनःतस्याः
ध्यायांलग्नसमाधिप्राप्तध्यानंवर्त्तते तथापिहन्तखेदेविरहव्याधिःकथंवर्त्तते ध्यानसक्तस्ययोगिनोव्याधिनाशात् ५

गी०गो०टी०
२०

अधुनाकविर्भक्ताभ्यन्याशिषंब्रूते तिर्यगिति मधुसूदनस्यकृष्णस्यकराक्षोर्मयः कटाक्षदर्शनतरंगाः वोयुष्माकंभक्तानांश्रे
यकल्याणंचिरंदधतुप्रयच्छंतु कीदृशाः मधुरेणसुंदरेणराधामुखचंद्रेमंसुगंधअयंचक्रेमृदुस्पंदंचकिंचिच्चलनंयथास्यात्तथाकं
दलिताःपल्लविताः पुनःकीदृशाःवंशावंशाइच्चारस्तुवेणोर्निगच्छत्सुगीतस्थानेषुजातपदेषुकृतावधानैर्दत्तमनोभिर्ललि

तिर्यक्कंठविलोलमौलितरलोत्तंसस्यवंशोच्चरद्गीतस्थानकृतावधानललना
लक्षैर्नसंलक्षिताः संमुग्धंमधुसूदनस्यमधुरेराधामुखेंदौमृदुस्पंदंपल्लविताश्चि
रंदधतुवःक्षेमंकटाक्षोर्मयः ६ इतिगीतगोविंदेमुग्ध
मधुसूदनोनामतृतीयःसर्गःसमाप्तः

ललक्षैर्गोपांगनासहस्रैर्नसंलक्षिताःज्ञाताःनदृष्टाइत्यर्थः कीदृशस्यमधुसूदनस्यतिर्यक्चक्रःकंठोयस्यविलोलश्चंचलो
मौलिमस्तकःकिरीटोवायस्यतरलश्चंचलउत्तंसःअवतंसोयस्यसः पश्चात्कर्मधारयः लक्षपदंबहुत्वोपलक्षकं मुग्धाहारिणिरहौत्यर्थः ६

इति गीतगोविंदे तृतीयः सर्गः

इदानीं राधामाधवी रूपं प्रत्याह यमुनेति राधिकासखी माधवं रूपं प्राह वक्ष्यमाणमुक्तवती कीदृशं माधवं यमुनातीरे यो वानीरस्तत्र निकुंजो वेतसो पल्लविततलतागृहं तत्र मंदं तिष्ठन्ती आश्रितं आसीनं पुनः कीदृशं प्रेमभरेण राधायाः प्रेमातिशयेन उद्भ्रांतं उद्विग्नचित्तं कथं मयि प्रसादं यास्यतीति उक्तश्लोकार्थं गीतेनाह १ निंदतीति अस्य कर्णाटरागः रागलक्षणं च कृपाणपाणिर्गजदंतपत्रमेकं वहन् दक्षिणकर्णपूरे संस्तूयमानः सुरचारणौघैः कर्णाटरागः शिखिनीलकंठ इति १ अत्र गीते विरहोत्कंठिता वर्णनीया तत्र कथ्यास्वप्रोषितनायका वर्ण्यन्ते वासकसज्जा कलहान्तरिता उत्कंठा स्वाधीनभर्तृ

यमुनातीरवानीरनिकुंजे मंदमास्थितं प्राह

प्रेमभरोद्भ्रांतं माधवं राधिकासखी १ कर्णाटरागेण गीयते एकतालीताले निं

निं दति चंदनमिंदुकिरणमनुविंदति खेदमधीरं व्यालनिलयमिलनेन गरलमिव कलय

ति मलयसमीरं १ सा विरहे तव दीना माधव मनसिजविशिखभयादिव भावनया त्वयि लीना

विप्रलब्धा अभिसारिका खंडिताप्रोषिता चैव नायिका चाष्टसंमिताः १ तत्र समुत्कंठालक्षणं भारतोक्तं यस्याः समुचितेऽप्याहि प्रवासी नैति वल्लभः सा स्मरानलसंतप्ता विरहोत्कं ठिता मतेति गीतार्थस्तु हे माधव कृष्ण सा राधा तव विरहे मानिरतां दुःखिता त्वयि तद्विषये भावनया अनुचिन्तनेन कामबाणः कृष्णविरहे प्रविश्य स्थितां मानपीडयिष्यतीति भावना लीना प्रविष्टा कस्मात् विमनसि जविशिखभयादिव कामबाणभयादिव केन प्रकारेण निंदतीत्याह हे कृष्ण सा राधा चंदनं निंदति इंदुकिरणं चंद्ररश्मिसमूहं नासीकृत्य अधीरं महान्तं खेदमनुतापं विंदति अनुचमलयसमीरं मलयजवातं व्यालनिलयमिलनेन

गीतगो॰टी॰
२१

आविरलेति हे कृष्ण सारधास्त्वद्हृदयमर्मणि सजलनलिनीदलजालं सजलकमलिनीपत्रसमूहमेव वर्मकवचं करोति कस्मै प्रयोजनाय भवरवनापस्वद्हृदयस्थितस्य भवतो रक्षणाय कस्मादिव आविरलनीरंतरात्रिपतितो घोमदनशरःकामबाणस्तस्मादिव कीदृशं मर्मविशालं विस्तीर्णत्वं तयाद्हृदये सर्वदा निधापितो सि भावः २ कुसुमेति कुसुमसयनीयं पुष्पशय्यां करोति अनव्याविलासकलाविशालं विस्तीर्णत्वं तयाद्हृदये सर्वदा निधापितो सि भावः

मनत्पर

आविरलनिपतितमदनशरादिव भवदवनाय विशालं स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालं २ कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयं व्रतमिव तव परिरंभसुखाय करोति कुसुमशयनीयं ३ ध१

लिभिः बहुतरक्रीडाभिः कामनीयं सुंदरं पुष्पशय्यां स्वयमेव मनोज्ञा इयं तु विरचनाकुशला शय्याभावे पुष्पशय्यामेव करोति स्यर्थः किमिव कुसुमविशिखः कामस्तस्य शराः पुष्पाणि तान्येव तल्पं शय्या तादृशं व्रतमिव शरशय्यासयनरूपं सरूपं अनतमिव किमर्थं व्रतमित्यत आह तव परिरंभसुखाय आलिंगनसुखं प्राप्तमित्यर्थः ३

राम
२१

वहतीति साराधा उदारं मनोज्ञं आननकमलं वहती धारयति कीदृशं वलितमुच्छ्वासितं यद्विलोचनजलं नेत्राश्रु तद्धारयतीति कामिवः विधुमिव कीदृशं विधुं विकटेनशासनेन महता विधुंतुदस्य राहोर्दन्तेन दलनात् खंडनात् गलिताऽमृतधारा यस्मात् ४ विलिखतीति हे कृष्ण साराधा असमसरभूतं कंदर्पस्वरूपं भवन्तं त्वां रहसि एकान्ते कुरंगमदेन कस्तूरिकया विलिखति अथः कामस्य भवतोऽधस्तान्मकरं कामवाहनं विनिधाय कृत्वा करे हस्ते नवचूतं नूतनाम्ररूपं शरं वाणं च विनिधाय संस्थाप्य प्रणमति प्रजानंत

वहति च वलितविलोचनजलधरमाननकमलमुदारं विधुमिव विकटविधुंतुददन्तदलनगलितामृतधारं ४ विलिखति रहसि कुरंगमदेन भवन्तमसमसरभूतं प्रणमति मकरमधो विनिधाय करे च शरं नवचूतं ५ प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहं त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहं ६ ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापं विलपति हसति विषीदति रोदिति चंचति मुंचति तापं ७ कुचिति ४

रंगा(?)णामोऽसुम्यन एवं प्रकारायध्वजत्वेन प्रसिद्धेऽपि वाहनत्वेन दोषः ५ प्रतिपदमिति हे कृष्ण साराधा प्रतिपदं प्रतिक्षणमिदमपि निगदति हे माधव कृष्ण तव चरणे इ पतिता किमर्थमित्यत आह त्वयि विमुखे पराङ्मुखे सति मयि सपदि तत्क्षणं सुधानिधिश्चन्द्रोऽपि तनुदाहं शरीरपीडां तनुते विस्तारयति अतस्त्वं शोध्य(?)मेवं कुरु अहं तव चरणे पतिता ६ ध्यानेति हे कृष्ण अतीव दुरापं दुःखेनापि दुर्लभं भवन्तं ध्यानलयेन चित्तैकाग्र्येण पुरोऽग्रे परिकल्प्य कल्पनाकृत्वा मामपि स्नेहाद्यदानीमपि न कृतो निद्रा विलापं करोति हसति भवद्दर्शनेन विषीदति खिद्यति हास्यानंतरमानर्थक्यात् अनन्तरो(?) हसति वंचनि स्थानान्तर गच्छति स्थानान्तरे आलिंगनादिकं करिष्यतीति अतस्त्वत्तापं मुंचति मनाला

त३

[illegible] ७

गीतगो॰टी
२२

श्रीजयदेवेति श्रीजयदेवे भणितं कथितमिदं गीतं मनसा चिंतेनाधिकं सातिशयं परिनटनीयं नर्त्तयितव्यं तदाह विरहेन कृष्णवि
योगेनाकुलाया वल्लवयुवत्या राधायाः सखीवचनं गीतरूपं पठनीयं जयदेवगीते सुहृद्भा तिशया भिनभावः ८ गीतोक्तमर्थं श्लोकेना
ह आवासइति हे कृष्ण हन्तेति खेदं माराधापि त्वद्विरहेण भवद्वियोगेन हरिणीरूपायते मृगीरूपमिवाचरति कथमित्यत आह आ
वासो गृहं विपिनायते वनमिवाचरति नितान्तं त्वद्विरहात् प्रियसखीमालापि मम हे प्रियस्वेच्छागमननिवारकत्वाज्जालायते जालमिवा

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयं हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयं ८
आवासो विपिनायते प्रियसखीमालापि जालायते तापोपि श्वसितेन दाववहनज्वालाकलापायते
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं कंदर्पोपि यमायते विरचयञ्छार्दूलविक्रीडितं ९

चरति तापोपि देहदाहो विश्वसितेन श्वासोच्छ्वासेन दाववहनज्वालाकलापायते आरण्यवह्निज्वालापरंपरेवाचरति कंदर्पोपि
कथं यमायते यम इवाचरति हा शब्दः स्वात्मनो दुःखाधिक्यसूचनार्थः कीदृशः कंदर्पः शार्दूलविक्रीडितं व्याघ्रचेष्टितं
विरचयन् कुर्वन् मृगीमरणं शार्दूलादेव भवति ९ श्रीरामजयराम श्रीरामजयराम हरे श्रीराम श्रीराम श्रीराम श्रीराम

राम
२२

इदानीं सखी पुरः स्थिराधायाः दुःखचेष्टितं गीतेनाह॥ स्तनेति॥ देसाखरागः॥ रागलक्षणं॥
आस्फोटयन्ना विस्फारितरो महर्षो निपुणः सन्नद्धविशालबाहुः प्रांशुः प्रचंडः कोनीरङ्गो
गो देशाखरागः किलमल्लमूर्तिः॥ हे केशव कृष्ण तव विरहे जाते सति राधिका एवं चेष्टिते

देशाखरागेण गीयते॥ एकतालीताले॥ स्तनविनिहितमपिहारमुदारं॥ सा मनुते कृ
शतनुरिव भारं॥ १॥ राधिका विरहे तव केशव॥ सरसमसृणमपि मलयजपंकं॥ पश्यति वि

कीदृशमित्यत आह॥ कृशा तनुः विरहकृशशरीरा सा राधा स्तनविनिहितमपि स्तन
योः स्थापितमुदारं बहुमूल्यं हारमपि भारमिव मनुते॥ १॥ सरसमिति॥ सा राधा सरस
मसृणं सांद्रं चिक्कणं मलयजपंकमपि चंदनलेपमपि वपुषि संशंकं विषमिव पश्यति॥ नव

विरहात्॥ २८॥ विभिनवतसुम्भमकेशा॥

श्रीगीत॰टी॰
२२

श्वसितेति।। सा राधा श्वसितपवनं निश्वासवायुं मदनदहनमिव कामाग्निमिव वहति धारयति। वा येन यदाहत्य कृत्।। कीदृशं अनुपमं उपमारहितं। अतः परिणाहो विशालता यस्य सदाहं सुष्ठु दाहयुक्तं।। ३।। दिशीति।। सा राधा सजलकणजालं अश्रुबिंदुसमूहसहितं नयननलिनं

श्वसितपवनमनुपमपरिणाहं।। मदनदहनमिव वहति सदाहं।। ३।। दिशि दिशि किरति सजलकणजालं।। नयननलिनमिव विगलितनालं ४ नयनविषयमपि किसलयतल्पं।। गणयति विहितहुताशविकल्पं।। ५।।

नेत्रपद्मं दिशि दिशि भवद्दर्शनवांछया विकरति निक्षिपति।। कीदृशमिव विगलितनालमिव गलितदंडमिव ४ नयनेति सा राधा नयनविषयमपि नेत्रगोचरमपि किसलयतल्पं पल्लवशयनं विहितः कृतः हुताशविकल्पो अग्नितर्को यत्र तादृशं गणयति मनुते।।

राम
२२

त्यजतीति सापाणितलेन हस्ततलेन कपोलं गंडस्थलं न त्यजति सचिंतत्वात् कीमि
दसायं संध्याकाले ऽलोलोलं निश्चलं वालशशिनमिव द्वितीयाचंद्रमिव हस्तेनाधारि
तत्वात् अल्पहस्यतयाच वालचंद्रसाम्यं हस्तस्य लोहितत्वात्संध्यासाम्यं ६ हरिरिति

त्यजति न पाणितलेन कपोलं वालशशिनमिव सायमलोलं ६ हरिरिति हरिरिति ज
पति सकामं विरहविहितमरणेव कामं ७ श्रीजयदेवभणितमिति गीतं सुखय
तु केशवपदमुपनीतं ८ रामचंद्र

सा निकामं अतिशयेन सकामं साभिलाषं हरिरिति जपति कथंभूतेव विरहविहितमरणे
व वियोगेन विहितं कृतं मरणं यस्याः सा अन्येपि मरणे हरिरिति मंत्रं जपति ७ श्रीजयदे
